श्री विष्णु स्तवनं

श्री विष्णु स्तवनं

मार्कंडेय उवाच |
नरं नृसिंहं नरनाथमच्युतं
प्रलंबबाहुं कमलायतेक्षणं |
क्षितीश्वरैरर्चितपादपंकजं
नमामि विष्णुं पुरुषं पुरातनं || 1 ||

जगत्पतिं क्षीरसमुद्रमंदिरं
तं शार्ङ्गपाणिं मुनिवृंदवंदितं |
श्रियः पतिं श्रीधरमीशमीश्वरं
नमामि गोविंदमनंतवर्चसं || 2 ||

अजं वरेण्यं जनदुःखनाशनं
गुरुं पुराणं पुरुषोत्तमं प्रभुं |
सहस्रसूर्यद्युतिमंतमच्युतं
नमामि भक्त्या हरिमाद्यमाधवं || 3 ||

पुरस्कृतं पुण्यवतां परां गतिं
क्षितीश्वरं लोकपतिं प्रजापतिं |
परं पराणामपि कारणं हरिं
नमामि लोकत्रयकर्मसाक्षिणं || 4 ||

भोगे त्वनंतस्य पयोदधौ सुरः
पुरा हि शेते भगवाननादिकृत् |
क्षीरोदवीचीकणिकांबुनोक्षितं
तं श्रीनिवासं प्रणतोऽस्मि केशवं || 5 ||

यो नारसिंहं वपुरास्थितो महान्
सुरो मुरारिर्मधुकैटभांतकृत् |
समस्तलोकार्तिहरं हिरण्यकं
नमामि विष्णुं सततं नमामि तं || 6 ||

अनंतमव्यक्तमतींद्रियं विभुं
स्वे स्वे हि रूपे स्वयमेव संस्थितं |
योगेश्वरैरेव सदा नमस्कृतं
नमामि भक्त्या सततं जनार्दनं || 7 ||

आनंदमेकं विरजं विदात्मकं
वृंदालयं योगिभिरेव पूजितं |
अणोरणीयांसमवृद्धिमक्षयं
नमामि भक्तप्रियमीश्वरं हरिं || 8 ||

इति श्रीनरसिंहपुराणे दशमोऽध्याये मार्कंडेय प्रोक्त श्रीविष्णु स्तवनं |